अथ छाया ।
"भवेदष्टविधच्छाया मणेर्मरकतस्य च ।
बर्हिपुच्छसमाभासा चासपक्षसमापरा ॥
हरिकोचनिभा चान्या तथा शैवालसन्निभा ।
खद्योतपृष्ठसंकाशा बालकीरसमा तथा ॥
नवशाद्वलसच्छाया शिरीषकुसुमोपमा ।
एवमष्टौ समाख्यातास्छाया मरकताश्रयाः ॥
छायाभिर्युक्तमेताभिः श्रेष्ठं मरकतं भवेत् ।
पद्मरागगतः स्वच्छो जलबिन्दुर्यथा भवेत् ।
तथा मरकतच्छाया श्यामला हरितामला ॥"
अथ दोषगुणाः ।
"दोषाः सप्त भवन्त्यस्य गुणः पञ्चविधो मतः ।
अस्निग्धं रूक्षमित्युक्तं व्याधिस्तस्य धृते भवेत् ॥
विस्फोटः स्यात् सपिड़के तत्र शस्त्रहतिर्भवेत् ।
सपाषाणे भवेदिष्टनाशो मरकते धृते ॥
विच्छायं मरकतं प्राहुर्वार्य्यते न तु धार्य्यते ।
शर्करं कर्करायुक्तं पुत्रशोकप्रदं धृतम् ॥
जठरं कान्तिहीनन्तु दंष्ट्रिवह्निभयावहम् ।
कल्माषवर्णं धवलं ततो मृत्युभयं भवेत् ॥
इति दोषाः समाख्याता वर्ण्यन्तेऽथ महागुणाः ।
निर्म्मलं कथितं स्वच्छं गुरु स्याद्गुरुतायुतम् ॥
स्निग्धं रूक्षविनिर्मुक्तमरजस्कमरेणुकम् ।
सुरागं रागबहुलं मणेः पञ्च गुणा मताः ॥
एतैर्युक्तं मरकतं सर्व्वपापभयापहम् ।
गजवाजिरथान्दत्त्वा विप्रेभ्यो वित्तराशि मे ॥
तत् फलं समवाप्नोति शुद्धे मरकते धृते ।
धनधान्यादिकरणे तथा सैन्यक्रियाविधौ ॥
विषरोगोपशमने कर्म्मस्वाथर्व्वणेषु च ।
शस्यते मुनिभिर्यस्मादयं मरकतो मणिः ॥"
तथा च ।
"स्वच्छता गुरुता कान्तिः स्निग्धत्वं पित्तकारणम् ।
हरिमिरञ्जकश्चैव सप्त मरकते गुणाः ॥"
अथ कृत्रिमाकृत्रिमपरीक्षा ।
"कृत्रिमत्वं सहजत्वं दृश्यते सूरिभिः क्वचित् ।
घर्षयेत् प्रस्तरे वज्रकाचस्तस्मादिपद्यते ॥
लेखयेल्लौहभृङ्गेण चूर्णनाय विलेपयेत् ।
सहजः कान्तिमाप्नोति कृत्रिमो मलिनायते ॥
वर्णस्यातिबहुत्वात् यस्यान्तः स्वच्छकिरणपरिधानम् ।
सान्द्रस्निग्धविशुद्धं कोमलवर्हप्रभादिसमकान्ति ।
चलोच्चलयः कान्त्या सान्द्राकारं विभासया भाति ।
तदपि गुणवत्त्वंशमाप्नोति हि यादृशी पूर्व्वम् ।
सकलकठोरं मलिनं रूक्षं पाषाणकर्करोपेतम् ।
दिग्धञ्च शिलाजतुना मरकतमेवंविधं विगुणम् ।
यत्किञ्चिद्भेदितं रत्नमन्यन्मरकताद्भवेत् ।
श्रेयस्कामैर्न तद्धार्य्यं क्रेतव्यं वा कथञ्चन ॥
भल्लातकपुत्रिका च सदृशंसमयोगतः ।
मणेर्मरकतस्यैते लक्षणीया विजातयः ॥
क्षौमेण वाससा मृष्टा दीप्तिं त्यजति पुत्रिका ।
लाघवेनैव काचस्य शक्या कर्त्तुं विभावना ॥
कस्यचिदनेकरूपैर्मरकतमनुगच्छतोऽपि गुणवर्णैः ।
भल्लातकस्य निर्भेतुर्वैशद्यमुपैति वर्णस्य ॥
वज्राणि मुक्ताः सन्त्यन्ये ये च केचिद्विजातयः ।
तेषामप्रतिबद्धानां भा भवत्यूर्द्ध्वगामिनी ॥
ऋजुत्वाच्चैव केषाञ्चित् कथञ्चिदुपजायते ।
तिर्य्यगालोक्यमानानां सद्यश्चैव प्रणश्यति ॥
स्नानाचमनजप्येषु रक्षामन्त्रक्रियाविधौ ।
दद्भिर्गोहिरण्यानि कुर्व्वद्भिः साधनानि च ॥
दैवपित्र्यातिथेयेषु गुरुसंपूजनेषु च ।
बाध्यमानेषु विषमैर्दोषजातैर्विषोद्भवैः ॥
दोषैर्हीनं गुणैर्युक्तं काञ्चनप्रतियोजितम् ।
संग्रामे विचरद्भिश्च धार्य्यं मरकतं बुधैः ॥"
अथ मूल्यम् ।
"तुलया पद्मरागस्य यन्मूल्यमुपजायते ।
लभतेऽभ्यधिकं तस्मात् गुणैर्मरकतं स्मृतम् ॥
तथा च पद्मरागाणां दोषैर्मूल्यं प्रणीयते ।
ततोऽप्यभ्यधिका हानिर्दोषैर्मरकते भवेत् ॥
गुणपिण्डसमायुक्ते हरितश्यामभास्वरे ।
मूल्यं द्वादशकं प्रोक्तं जातिभेदेन सूरिभिः ॥
यवैकेन शतं पञ्चसहस्रं द्वितये यवे ।
त्रिभिश्चैव सहस्रे द्वे चतुर्भिश्च चतुर्गुणम् ॥"
इति गारुड़े मरकतपरीक्षा ७१ अध्यायः युक्तिकल्पतरुश्च ॥

**मरकतपत्री,** स्त्री, (मरकतमिव पत्रं यस्याः । ङीष् । तद्वर्णसादृश्यादेवास्यास्तथात्वम् ।) पाची । इति राजनिर्घण्टः ॥

**मरक्तं,** क्ली, (मरकतम् । पृषोदरादित्वात् साधुः ।) मरकतमणिः । इति शब्दरत्नावली ॥

**मरणं,** क्ली, (म्रियतेऽनेनेति । मृ + करणे ल्युट् ।) वत्सनाभः । इति राजनिर्घण्टः ॥ (भावे ल्युट् ।) विजातीयात्ममनःसंयोगध्वंसः । इति न्यायमतम् ॥ तत्पर्य्यायः । पञ्चता १ कालधर्म्मः २ दिष्टान्तः ३ प्रलयः ४ अत्ययः ५ अन्तः ६ नाशः ७ मृत्युः ८ निधनम् ९ । इत्यमरः । २ । ८ । ११६ ॥ भूमिलाभः १० निपातः ११ आत्ययिकम् १२ मृतिः १३ । इति शब्दरत्नावली ॥ कीर्त्तिशेषः १४ महानिद्रा १५ महापथगमः १६ संस्थानम् १७ । इति जटाधरः ॥

मरणदुःखान्याह ।
"मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ।
कण्ठग्रीवाङ्घ्रिहस्तोऽथ व्याप्तो वेपथुना नरः ॥
मुहुर्ग्लानिः परवशो मुहुर्ज्ञानलवान्वितः ।
हिरण्यधान्यतनयभार्य्याभृत्यगृहादिषु ।
एते कथं भविष्यन्तीत्यतीवममताकुलः ॥
मर्म्मभिद्भिर्महारोगैः क्रकचैरिव दारुणैः ।
शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥
विवर्त्तमानताराक्षिहस्तपादं मुहुः क्षिपन् ।
संशुष्यमाणताल्वोष्ठपुटो घुरघुरायते ॥
निरुद्धकण्ठो दोषौघैरुदानश्वासपीड़ितः ।
तापेन महता व्याप्तस्तृषा चार्त्तस्तथा क्षुधा ॥
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिङ्करपीड़ितः ।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते ।
एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम् ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥ * ॥

मुमूर्षुमरणश्रावणनिषेधो यथा,—
"अग्नौ न निक्षिपेदग्निं नाद्भिः प्रशमयेत्तथा ।
मुमूर्षुमरणार्त्तिं वा न स्वयं श्रावयेत् परान् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥ * ॥

अथ धार्म्मिकमरणलक्षणम् ।
सोमशर्म्मोवाच ।
"धर्म्मो हि कीदृशो मृत्युर्जन्म चैव वदस्व मे ।
उभयोर्लक्षणं कान्ते ! त्वमेवं हि वदस्व मे ॥
सुमनोवाच ।
सत्यं शौचं क्षमा शान्तिस्तीर्थं पुण्यादिकं तथा
धर्म्मश्च पालितं येन तस्य मृत्युं वदाम्यहम् ॥
रोगो न जायते तस्य न च पीड़ा कलेवरे ।
न श्रमो वै न च ग्लानिर्न च स्वेदो भ्रमस्तथा ॥
दिव्यरूपधरा भूत्वा गन्धर्व्वा ब्राह्मणास्तथा ।
वेदपाठसमायुक्ता गतिज्ञानविशारदाः ॥
तस्य पार्श्वं समायान्ति स्तुतिं कुर्व्वन्ति चाहुताम् ।
सुस्थो हि आसने युक्तो देवपूजारतः किल ॥
तीर्थञ्च लभते प्राज्ञः स्नानार्थं धर्म्मतत्परः ।
अग्न्यगारे च गोष्ठे च देवतायतनेषु च ॥
आरामे च तड़ागे च यत्राश्वत्थो वटस्तथा ।
न्यग्रोधं समाश्रित्य श्रीवृक्षन्तु तथा पुनः ॥
अश्वस्थानं समाश्रित्य गजस्थानं ततो नरः ।
अशोकं चूतवृक्षञ्च समाश्रित्य यदा स्थितः ॥
सन्निधिं ब्राह्मणानाञ्च राजवेश्मगतोऽपि वा ।
रणभूमिं समाश्रित्य पुरा यत्र मृता भटाः ॥
मृत्युस्थानानि पुण्यानि केवलं धर्म्मकारणम् ।
गोग्रहन्तु समं प्राप्य तथा समरसङ्कटम् ॥
शुद्धधर्म्मकरो नित्यं धर्म्मतो धर्म्मवत्सलः ।
एवं स्थानं समाप्नोति यदा मृत्युं समाश्रितः ॥
मातरं पश्यते पुण्यं पितरञ्च नरोत्तमम् ।
भ्रातरं श्रेयसा युक्तमन्यं स्वजनबान्धवम् ।
वन्दिजनं तथा पुण्यं स्तूयमानं पुनः पुनः ।
पापिष्ठं नैव पश्येत मातृपित्रादिकं पुनः ॥
गीतं गायन्ति गन्धर्व्वाः स्तुवन्ति स्तावकाः स्तवैः ।
मन्त्रपाठैस्तथा विप्रा माता स्नेहेन पूजयेत् ॥
पिता स्वजनवर्गश्च धर्म्मात्मानं महामतिम् ।
एवंभूताः समाख्याताः पुण्यस्थानानि ते विभो ! ।
प्रत्यक्षान् पश्यते भूतान् हास्यस्नेहसमाकुलान् ॥
न च स्वप्नेन मोहेन क्लेशरक्तेन वै वत ॥
धर्म्मराजो महाप्राज्ञो दूरात्तन्तु समाह्वयेत् ।
एह्येहि त्वं महाभाग ! यत्र धर्म्मः स तिष्ठति ॥
तस्य मोहो न च भ्रान्तिर्न ग्लानिर्न च विक्रिया ।
जायते नात्र सन्देहः प्रसन्नात्मा प्रतिष्ठते ॥
ज्ञानविज्ञानसम्पन्नः स्मरन्नेव जनार्द्दनम् ।